International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 29-32
© 2019 IJSR
www.anantaajournal.com
Received: 24-07-2019
Accepted: 28-08-2019

**Dr. Avula Priyanka**
Junior Researcher, EFEO,
Pondicherry, India

**Correspondence**
**Dr. Avula Priyanka**
Junior Researcher, EFEO,
Pondicherry, India

# मनुस्मृतौ महिलायाः स्थानम्

**Dr. Avula Priyanka**

## प्रस्तावना

स्त्रीस्वातन्त्यम् अधिकृत्य विशेषचर्चा प्रचलति एषु दिनेषु। पाश्चात्यदृष्टिचोदितया विचार-धारया प्रेरिताः बहवः विद्वांसः मनुस्मृतिं निन्दन्ति। अनाघ्रातस्मृतयः ते प्रतिपादयन्ति यत् मनुना स्त्री अधरीकृता इति। एवं तर्हि स्त्रीविषये मनुमहर्षेः का दृष्टिः आसीत् इति जिज्ञासा स्यात् बहूनाम्। तादृशीं जिज्ञासां शमयितुम् प्रस्तुतीक्रियते एषः लेखः। लेखनस्य प्रथमः भागः अस्ति अत्र। वैदिकधर्मस्य बालयित्र्या भारतीयमहिलया कीदृशं स्वातन्त्र्यम् अपेक्ष्यते ? स्वच्छन्दसञ्चारः, हावभावख्यापनं, यथेच्छं परस्थलगमनम् इत्यादिकम् अपेक्ष्यते किम् ? धार्मिककर्मसु न मम क्षध्दा। धिक् देवपूजाम्। धिक् सम्प्रदायादिकम् इत्येततेकथनरूपं स्वातन्त्र्यम् अपेक्ष्यते तया ? एतत्सर्वं स्वच्छन्दवृत्तिः, न तु स्वातन्त्र्यम्। मनुः अन्ये शास्त्रकाराः च स्वच्छन्दवृत्तेः निषेदं कुर्वन्ति। यथा इदानीं तथा प्राचीने काले ग्रामे ग्रामे विद्यालयाः न आसन् । मातापित्रोः सकाशात् एव कन्यया विद्या यथाशक्ति ग्रहीतव्या भवतिस्म। अतः वयसा, विद्यया, लोकानुभवेन च ज्येष्ठस्य पत्युः प्रीधान्यं गृहे सहजतया भवति स्म।एतद्विषये स्त्रियाः अस्वातन्त्र्यं भवति स्म इति तु सत्यम् एव। किन्तु एतादृशम् अस्वातन्त्र्यं कुत्र नास्ति ? वयं इदानीं अत्र पश्यामः।

## सामान्यपरिचयः

भारतीय संस्कृतौ महिलानां कीदृशं स्थानम् आसीत् इति विषयम् अधिकृत्य एतावता बहवः प्रबन्धाः लिखिताः सन्ति, अनेकानि लेखनानि पाश्चात्यदृष्टि-चेदितानि एव भवन्ति प्रायः। पाश्चात्याः विद्वांसः भावयन्ति स्म यत् भारतीयसंस्कृतेः परीक्षार्थम् अस्माकम् एव निकषोपलसदृशं सामर्थ्यम् अस्ति इति। आंग्लाः एव भारते शासकाः आसन् इत्यतः भारतीयानां तोलनाधिकारः पाश्चात्यपण्डितैः सहजतया प्राप्तः आसीत्।तेषाम् अनुकरणात् एव परमानन्दं प्राप्नुवन्तः भारतीयविद्वांसः अत्र तादृशान् एव आपणान् आरब्दवन्तः, यत्र च पाश्चात्यतुलाम् अवलम्ब्य पाश्चात्यवस्तूनाम् एव विक्रयणं क्रियते स्म। एतादृशैः विद्वद्भिः स्त्रीणां स्थानम् अधिकृत्य लिखितानि लेखनानि तदा तदा प्रकट्यते।

धर्मशास्त्राणि पुरुषैः लिखितानि। ते च पुरुषाः समाजे स्वश्रेष्ठतां प्रतिष्ठापयन्तः स्त्रीम् अधोगतिम् प्रापयन्तः भोगसाधनानि कृतवन्तः इत्यस्ति तेषां कथनस्य आशयः। एतान् विचारान् मान्याः अपि केचन मैनसम्मत्या

अङ्गीकुर्वन्ति इत्यतः वस्तुस्थितेः परीक्षणार्थम् इदमत्र प्रस्तूयते किञ्चित्। विषयः अत्र सङ्क्षेपेण एव निरूप्यते, यतः विस्तरस्य न अयम् अवसरः। ते च मनुस्मृतिम् आधारीकृत्य एव किञ्चिदत्र विचार्यते।प्रथमं तावत् चिन्तयाम – किं नाम धर्मशास्त्रम् ? धर्मशास्त्रं नाम तादृशः विधिकोषः न, यश्च पानमत्तानां, दुराचारपराणाम्, अज्ञानां च मतानि सम्पाद्य शासनसभां प्रविश्य रागद्वेषादिकं सर्वथा अपरित्यज्य कलहैकवृत्या व्यवहरद्भिः शासकैः अङ्गीकृतः भवन्ति। ऋषिजनाः मानवानाम् अभ्युदय – निश्रेयससिद्ध्यै तपोबलेन यत् साधनम् आसादितवन्तः सः एव धर्मो नाम। ते धर्मशास्त्रं परमया करुणया स्त्रीपुरुषाणां हिताय एव रचितवन्तः, न तु अधिकार - धन – कीर्त्यादि – स्वार्थ सम्पादनार्थम्। सर्वकारस्य विधिनियमाः तावत् जनानां स्वच्छन्दप्रवृत्तिं निरुध्य तेषां बाह्यव्यवहारस्य नियन्त्रणं कुर्वन्ति। किन्तु धर्मः तावत् न केवलं बाह्यव्यवहारम्, अपि तु अन्तः करणप्रवृत्तिम् अपि नियन्त्रयति। जीवनस्य लक्ष्यं निर्दिश्य, चित्तं शुद्धीकृत्य श्रेयोमार्गम् उपदिशति धर्मः। धर्ममार्गश्रयणम् अस्ति चेत् सर्वकारस्य विधिनियमादीनाम् का आवश्यकता ? अतः एव महाभारतं वदति – धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम् इति। शासननियमस्य रचनायाः सन्दर्भे स्वार्थपरतायाः, अधिकारलालसायाः च हस्तक्षेपः भवेत्। किन्तु धर्मविषये न तथा। धर्मस्य सामान्यं लक्षणं एतत् –

विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत।। (मनुस्मृतौ - 2.1)

“वेदार्थज्ञाः,रागद्वेषरहिताः,धार्मिकाः,सज्जनाः, विद्वांसः यं हृत्पूर्वकम् अङ्गीकृत्य यस्य अनुगुणम् आचरन्ति सः एव धर्मः”।

**मनुस्मृतौ महिलानां स्थानम्**

भारतीयानां दृष्ट्या वेदाःपरमं प्रमाणम्। वेदोक्तं एव विषयं विशदीकुर्वन्ति धर्मशास्त्राणि। इदानीं बहवो वेदभागाः लुप्ताः सन्ति। ‘ऋषयः वेदोक्तान् विषयान् स्मृत्वाधर्मशास्त्राणि रचितवन्तः’ इति वदन्ति शिष्टाः। अत एव धर्मशास्त्राणाम् अपरं नाम ‘स्मृतयः’ इति। स्मृतिग्रन्थेषु मनुस्मृतेः एव श्रेष्ठत्वम् अङ्गीक्रियते सर्वैः अपि धर्मशास्त्रकारैः। विद्वांसः अङ्गीकुर्वन्ति यत् मनुस्मृतिविरुद्धं यत्किमपि वचनं न प्रमाणभूतम् इति, याज्ञवल्क्यादिस्मृतिषु मनुस्मृतौ अनुक्ताः एव विषयाः उच्यन्ते इति च। भृगुः वदति – ‘मनुः सर्वज्ञानमयः’ इति। अतः वेदकालस्मृतिकालयोः पृथक्करणं, वेदकालस्य धर्मस्वरूपात् भिन्नम् आसीत् स्मृतिकारस्य धर्मस्य स्वरूपम् इति। कथनं च सर्वदा असङ्गतम्। वेदे एव मनोः उपदेशस्य प्रशंसा दृश्यते। मनुर्वै यत्किञ्चिदवदत् तद् भेषजम् इति वदति छान्दोग्यब्राह्मणम्।

प्रकृतं तावत् स्त्रीणां विषये मनुना यत् उक्तं तत् परिशीलयाम, येन च स्त्रीविषयिणी मनुमहर्षेः दृष्टिः स्फुटा स्यात्।

जगत्सृष्टिनिरूपणावसरे कश्चन श्लोकः –

१. द्विधा कृत्वात्मनो देहमर्थेन पुरुषोऽभवत्।
अर्धेन नारी..................।। (मनु-1.32)

ब्रह्मा स्वदेहं द्विधा विभज्य एकार्धेन पुरुषत्वम्, अपरार्धेन स्त्रीत्वं च प्राप्तवान् इति। देहस्य भागयोः कतरः उच्चः, कतरः नीचः? अतः एव महाकवेः कालिदासस्य कुमारसंभवे देवाः ब्रह्मणं स्तुतवन्तः “स्त्रीपुंसावात्मभागौ ते” (कुमार – 2.8) इति वदन्ति।

२.स्त्रीशियोः नामकरणविषये अपि मनोः शुभात्मिकां दृष्टिः। सः वदति –

स्त्रीणां सुबोद्यमक्रूरं विस्पष्टार्थं मनोहरम्।
माङ्गल्यं दीर्घवर्णान्तम् आशीर्वादाभिधानवत्।। - (मनु – 2.33)

स्त्रीशिशोः नाम सुखोच्चारणयोग्यं, क्रूरतासूचनरहितं, मनोहरं, मङ्गलकरं, देवतानुग्रहबोधकं च स्यात् इति। उदा – यशोदा, देवी इत्यादयः।

३.सम्भाषणसमये परनारीम् उद्दिश्य – ‘हे भवति, सुभगे, भगिनी’ इत्यादयः गौरवार्हाः शब्दाः प्रयोक्तव्याः। (2.1.29) यदि स्त्री अल्पवयस्का भवति तर्हि आयुष्मति इति सम्बोधनं करणीयम्।

४.मातृभगिनी, पितृभगिनी, मातुलानी, श्वश्रूः – इत्यादयः मातृवत् गुरुपत्नीवत् च आदरेण द्रष्टव्यः। भ्रातृजाया प्रतिदिनं पादयोः नमस्करणीया। परस्थलं गत्वा यदा प्रत्यागम्यते तदा बन्धुमहिलाः साष्टाङ्गं नमस्करणीयाः।

५. प्रयाणसमये यदि स्त्री अभिमुखम् आगच्छति तर्हि विनयेन मार्गः देयः। 2.138

**६. सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते।**

जनकात् सहस्रगुणितं गौरवं मातुः स्यात्।। 2.145

**७. गुरुपत्नी वयसा कनिष्ठा चेदपि विधिवत् वन्दनं करणीयम्।** 2.216

**८. a) तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते।** - 2.228

माता, पिता, आचार्यः च यदा सन्तुष्टाः भवन्ति तदा एव तपः पूर्णतां याति।

**b) तेषां त्रयाणां शुश्रूषा परमं तप उच्यते।**

माता-पितृ-गुरूणां सेवा एव श्रेष्ठं तपः।

**c) त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्रयः।**– 2.230

माता–पिता–आचार्यश्च वेदस्वरूपाः, त्रेताग्निस्वरूपाश्च।

**d) त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते।**
**एष धर्मः परः साक्षादुपवर्मोऽन्य उच्यते।।**2.238

माता-पितृ-गुरूणां सेवा एव श्रेष्ठः धर्मः। अन्ये गौणः।

**९. a) माता पृथिव्याः मूर्तिः।** - 2.225

**b) माताग्निर्दक्षिणः स्मृतः।** - 2.131

गार्हपत्याग्निः, दक्षिणाग्निः,आह्वनीयाग्निः इति त्रयः अग्नयः। तत्र माता दक्षिणाग्निस्वरूपा भवति।

**c) इमं लोकं मातृभक्त्या........(समश्नुते)।**– 2.233

मातृभक्त्या जनाः एतं लोकं जयन्ति।

**१०. स्त्रीरत्नं दुष्कुलादपि।**

कन्या नीचकुले जाता चेदपि यदि गुणवती भवति तर्हि परिग्रहयोग्या भवति।

स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः।
नारीयाणानि वस्त्रं वा ते पापायान्त्यधोगतिम्।। - 3.52

स्त्री संबद्धं धनं, सुवर्णं, वस्त्रम्, ऐश्वर्यम् इत्यादीनां उपयोगं ये बान्धवाः कुर्वन्ति ते पापिनः भवन्ति, अधो गतिम् च यान्ति। पुरुषाः औद्धत्येन कदाचित् स्त्रीघनं बलात् वशीकृत्य उपयोक्तुं अर्हन्ति। अतः एतत् वचनं मनोः। गृहकृत्येषु स्त्री व्याप्ता भवति स्म। धनार्जनादयः बाह्यव्यवहाराः पुरुषायत्ताः भवन्ति स्म। एवम् उभयसहकारेण कौटुम्बिकरथः निर्विघ्नम् अग्रे गच्छति स्म। धनबलात् स्वतस्सिद्धात् देहवलात् च पुरुषः अहङ्कारेणव्यवहरन् नारीम् उपेक्षया पश्येत् इत्यतः स्मृतिकारस्य हितवचनं एतत्।

पितृभिः भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः।। 3.55

विवाहानन्तरम् अपि पिताभ्रात्रादिभिः स्त्री आदरेण द्रष्टव्या, वस्त्रभोजनादिदानेन सत्करणीया च। पतिगृहे अपि देवराधिभिः अपि एवम् एव व्यवहरणीयम्।

यत्रनार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।

यस्मिन् गृहे स्त्रियाः सम्मानः भवति तत्र देवाः वरप्रदाः भवन्ति। यत्र ताः न पूज्यन्ते तत्र प्रवर्तमानाः सर्वाः क्रियाः विफलाः भवन्ति।

शोचन्ति जामयो यत्र विनश्यत्यासु तत्कुलम्। - 3.57

यस्मिन् कुले पत्नी, स्नुषा, पुत्री इत्यादयः शोकम् अनुभवन्ति तत् कुलं शीघ्रम् नाशं प्राप्नोति। यत्र ताः योग्यं गौरवम् अप्रापनुवत्यः शपन्ति तानि गृहाणि पिशाचग्रस्तानि इव विनाशं यान्ति। -

सुवासिनीः कुमारीश्च रोगिणो गर्भिणीः स्त्रियः।
अतिथिभ्योऽग्र एवैतान्भोजयेदविचारयन्।। 3.114

भोजनविलम्बसन्दर्भः यदा भवति तदा सद्योविवाहिताभ्यः, गर्भिणीभ्यः, अविवाहिताभ्यः पुत्रीभ्यश्च अतिथीनां भोजनात् पूर्वम् एव भोजनम् दातव्यम्। पुरुषाणां पूर्वभोजनस्य प्रस्तावः एव नास्ति। स्त्रीविषये विशोषानुकम्पा मनुमहर्षेः।

**उपसंहारः**

प्राचीनकाले नदीतराणां नौकया एव भवति स्म। तत्सम्बधितया वदति मनुः गर्भिणीनिश्शुल्कं नौकया नेतव्या, ततः शुल्कं न स्वीकरणीयं इति। पत्नी देवैः दत्ता, न तु मया इच्छानुसारम् प्राप्ता इति भावनीयम्।दातृणां देवानां सन्तोषार्थं सदा सा रक्षणीया। स्त्रीरक्षणं नाम बलात् गृहे बन्धनं न। पार्श्वादीनाम् पालनं यथा, तथा निर्बन्धेन रक्षितुम् ताः न अर्हाः।तासां शील चारित्र्यादीनां भङ्गः यथा न स्यात् तथा रक्षणं करणीयम्। उपरि

यानि वाक्यानि निर्दिष्टानि तेषां परिशीलनात् किं भासते भवतां मनसि? मनुस्मृतिकारः पुरुषपक्षपाती इति किं भासते ? जनकात् अपि माता सहस्रगुणितं पूज्या इति वदति मनुः। यतः प्रसूति – पालन – पोषणादिकम् कुर्वत्याः मातुः श्रमः अत्यधिकः। तदर्थम् एव तादृशम् गौरवं तस्याः। प्रकृतिसिद्धानि कानिचन दौर्बल्यानि मनसि निधाय केषुचित् अंशेषु स्त्रीणां स्थानं निश्चितवन्तः मनुमहर्षिः। एवं मनुमहर्षिः अन्ये शास्त्रकारः चापि स्त्रियम् अनुकम्पया औदार्येण च दृष्टवन्तः सन्ति। धर्मशास्त्रम् अपरिशील्य, वस्तुस्तितिम् अज्ञात्वा केचन मनुस्मृतिं स्मृतिकारान् च आक्षिपन्ति।

**उपयुक्त ग्रन्थसूचि**


1. मनुस्मृति, डा.यन्.यल्.नरसिंहाचार्य, गायत्री पब्लिकेषन्स्, हैदराबाद्, 1992.
2. साहित्यमे नारी विविध संदर्भ, डा.रामेश्वरनारायण, नचिकेत प्रकाशन्, दिल्ली, 1993.
3. ऋग्वेद मे नारी, डा.श्रीमति कमला, लक्ष्मीप्रकाशन्, दिल्ली, 2004.
4. महाभारत विज्ञानदर्शन, डा.राजकुमारी, अभिषेक प्रकाशन् दिल्ली, 2008.
5. महाभारत, वेदव्यास, गीताप्रेस्, गोरखपूर्, 1990.
6. सम्मान्यः रङ्गनाथशर्मवर्थः हिन्दि पत्रिका।
7. कुमार संभवम्, कालिदासः, वाराणसी पब्लिकेषन्स्, वाराणसी, 1997.